# Shri Chandrashekhara Nakshatramala

# श्रीचन्द्रशेखरनक्षत्रमाला

## Document Information

Text title : Shri Chandrashekhara Nakshatramala

File name : chandrashekharanakShatramAlA.itx

Category : deities_misc, gurudev

Location : doc_deities_misc

Author : veNkaTeshashAstri

Proofread by : Ravi Venkatraman

Description/comments : Bhakta Kusumanjali Handful of Devtional Flowers on the Occasion of the Shri Chandrashekara Nakshatramahotsava (1912-1938) of Sri Chandrasekhara Bharati Swami of Sringeri

Latest update : October 17, 2020

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 17, 2022

*sanskritdocuments.org*

# श्रीचन्द्रशेखरनक्षत्रमाला

श्रीमच्छृङ्गगिरौ महामहिमनि प्रद्योतमाने मठे
नित्यं सन्निहितां हितां प्रणमते श्रीशारदाम्बां तथा ।
प्रख्यातं भुवि चन्द्रमौलिवचसा लिङ्गं समाराधयन्
संलीनो मुदि चन्द्रशेखरगुरुप्रष्ठो विभाति स्फुटम् ॥ १॥

मत्पूज्यस्त्विति भावना समुदियाल्लोकस्य यद्दर्शनाद्
गम्भीरैर्मृदुभिर्यदीयभणितैर्मन्दस्मितोपस्कृतैः ।
श्रोत्रन्तःकरणं शिलोपममपि प्रेयान्मृदुत्वं ध्रुवं
नित्यं नृत्यतु मे मनोमधुकरस्तत्पादपद्मद्वये ॥ २॥

चण्डत्वाख्या न वृत्तिर्मनसि समुदियाद्यस्य सत्त्वप्रधाने
सर्वे कामाः समन्ताद्वशमुपगमिता यं विजेतुं प्रवृत्ताः ।
वैराग्याख्यात्स्वकीयात्सुदृढतरभटाद्विक्लबं हन्त याता
धावत्सूक्तं जपन्तो विलयमुपगता जन्म नैव प्रयायुः ॥ ३॥

द्रढिमा वसतिविहीनो मनोऽन्तरे यन्मानसरङ्गे हि ।
नृत्यति तत एव सुखं नित्यं यः श्रीगुरुरनुभवति सदा ॥ ४
शेषोऽपि यस्य शमदान्तिमुखान्गुणान्नु
न ध्यातुमप्यलमिति प्रतियन्ति सर्वे ।
वाचस्पतिः खलु मतौ न मतं तदीयं
यश्चेहते ननु तथापि विचित्रमेतत् ॥ ५॥

खवृन्दं व्यावृत्तं विषयचयतो यस्य च गुरोः
सदा निर्व्यापारं तत इह मनो बाह्यविषयात् ।
निवृत्तं चैकाग्रं परमपदवीं हा सुखमयीं
स्पृशद्बुद्धावस्थं लयमुपगतं स्वात्मानि परे ॥ ६॥

रहसि वसतिर्यस्य प्रेमास्पदं न जनाकुले
श्रुतिरपि तथाऽऽचष्टे ध्यानोत्सुकान्यतिनः प्रति ।

अयमपि गुरुश्वासुप्रेरामृतेरिति वाक्यवि -
त्प्रविततमिह ध्यानासक्तः समस्ति न संशयः ॥ ७॥

भावं भावं परमपदवीं तत्त्वसाक्षात्कृतिं यः
संपद्याऽस्ते न खलु विशयोऽत्रेत्यहं प्रब्रवीमि ।
जीवन्मुक्तः क्षपयति परं नूनमारब्धकर्म
च्छान्दोग्यस्थं प्रवदति तथा तस्य तावद्वचो हि ॥ ८॥

रत्वा ब्रह्मणि नित्यतृप्तिमनिशं योऽसौ महादेशिकः
प्राप्तोऽतो न हि किञ्चिदस्ति सफलं कार्यं परं यद्यपि ।
“सक्ताः कर्मणि”पद्यवित्तु तदपि स्वाम्यर्चनाद्याः क्रियाः
कुर्वन्नस्ति हि लोकसङ्ग्रहमहो कर्तुं सदा प्रोत्सुकः ॥ ९॥

तीक्ष्णा बुद्धिर्यदीया कठिननयशिलां स्फोटयत्येव नूनं
वाक्यार्थोक्तिः सभायां प्रचकितमनसः कोविदान्संविधत्ते ।
प्रश्नान्शास्त्रे यदीयाननितरसुलभान्यः समाघातुमीष्टे
तादृग्विद्वान्न चाभून्न हि भवति तथा नो भविष्यत्यवन्याम् ॥ १०॥

स्वाधीना मणिदीधितिप्रभृतयो ग्रन्थाश्च गादाधरी
नृत्यन्ती बहुधा परिष्कृतियुता यत्कण्ठरङ्गस्थले ।
तस्मादेव महान्सुदेशिकवरो विद्वत्सभायां नये
तर्काख्ये विदधाति विस्मयकरं शार्दूलविक्रीडितम् ॥ ११॥

मिथ्यात्वं जगतः सुयुक्तिजटिलाः यद्वाग्झरीः शाङ्करीः
लोकानां स्पृशतां प्रभाति सुतरां तद्धाल्यरूपे सदा ।
गङ्गास्रोतसि मज्जनं विदधतः श्रीदेशिकेन्द्रप्रभोः
स्वान्तान्तर्मलमेव नास्ति परमानन्दः समस्ति प्रभान् ॥ १२॥
योगीन्द्रोऽयं भवे प्राच्यधिगतनिगमं संस्मरन्नेव बाल्ये
“आचार्याद्धैव विद्या” श्रुतिवचनवशः सद्गुरोर्न्यायशास्त्रम् ।
श्रीमत्प्रस्थानविद्यामपि च पठितवान्जैमिनीयं नयं च
शाब्दीं विद्यामवैतीति कथमपरथा तादृशी वैदुषी स्यात् ॥ १३॥

गिरीशः सद्भाष्यं व्यतनुत पुरा शङ्करमहा-
ऽवतारं प्राप्तः सन्नपरथयितुं भाष्यहृदयम् ।
जनं ज्ञात्वोद्युक्तं पुनरपि महादेशिकतया-
वतीर्णो निष्कृष्टामवगमयितुं भाष्यसरणिम् ॥ १४॥

पाठनरीतिर्यस्याऽवितरसुलभेति तच्छिष्यतां प्राप्ताः ।
आचक्षीरन् सुदृढं तद्विषये साक्षिभूतोऽहम् ॥ १५॥

दक्षोऽसौ विषयोपपादन इति श्रुत्वा कलार्थिव्रजाः
शीघ्रं शृङ्गगिरिं समेत्य सहसा यच्छिष्यभावं गताः ।
यच्छक्तिं महतीमहो प्रवचने दृष्ट्वा गता विस्मयं
पूर्वं यावगतिर्गुरौ प्रमितितां तस्यां हि निश्चिन्वते ॥ १६॥
तत्तादृक्षे सच्चिदानन्दविलासमन्दिरोनित्यम् ।
शुद्धान्पूज्यान्मन्त्रान्जापं जापं नित्यसुखे लग्नः ॥ १७॥

लगति सततं स्वान्तं शुद्धे परमात्मनि यस्य तु
व्यवहृतिरपि श्रेष्ठा गीतोदितस्थितधीसमा ।
अशनवसनप्रष्ठान्हेतून्शरीरपरिस्थिते-
र्न गणयति यः प्रारब्धाऽऽख्या कृतिस्तु नयेदिति ॥ १८॥
जानेऽहं यतिराडसावुपरतः प्रन्ने भवे सन्ततं
योगाभ्यासरतो मृतस्त्वनियतात्प्रारब्धकर्मक्षयात् ।
नाप्तो योगफलं च कृष्णवचनप्रामाण्यतो योगिनां
वंशे जात इति ध्रुवं ह्यपरथा त्वेवंविधः स्यात्कथम् ॥ १९॥

विध्यैकदेशमपि यत्सविधादनाप्त्वा
यत्सन्निधिस्थितिमहं समुपेत एव ।
धन्यं स्वकं ध्रुवमहो सततं विजानन्
कत्थे खलु प्रविदुषां सविधे सदा माम् ॥ २०॥

जय जय देशिकवर्य दर्शनमात्रेण जनान्प्रीणयसि ।
भावत्कपादनलिनं मच्चित्ते भासतां सततम् ॥ २१॥

यं पुत्रं प्राप्य विद्वान्स्वकृतसुकृततः प्राग्भवे गोपशास्त्री
लक्ष्म्यम्बाख्या सती च ध्रुवममितमुदं प्राप्य चेत्थं जगत्याम् ।
प्रख्यातिं प्राप्तवन्तौ सुजनिसफलतां यातवन्ताविमौ द्वौ
प्राचीने जन्मनीमावतिसुकृतवयं साध्वकार्ष्टां सुभक्त्या ॥ २२॥

ते विद्वांसः सुकृतिपुरुषा जन्मसाफल्यवन्तः
शास्त्राम्बोधेः सुतरणफलं नित्यमासादयन्तः ।
येऽमी नित्यं सहनिवसतिं देशिकेन्द्रेण शास्त्रे
वादाख्यां च प्रविततकथां कुर्वते मोदमानाः ॥ २३॥

तद्देशिकस्वामिगुरोः समासीत्पितामहः पण्डिततल्लजो हि ।
शब्दादिशास्त्रे गुरुवैदुषी च ततोऽभवद्धेतुसमं हि कार्यम् ॥ २४॥
मां भाति चैवं यतिभावयुक्तः
सन्त्यज्य गेहं परिधावतीति ।
सर्वान् जनान् बोधयितुं मुनीन्द्रः
संन्यासमाप्नोत्परिधाविवर्षे ॥ २५॥

स ह्यार्तानां सुरक्षानियमनविधिना नाशयन्नार्तिवृन्दं
जिज्ञासुभ्यश्च मोक्षप्रदमतिजनकं शास्त्रमध्यापयन्हि ।
अर्थार्थिभ्यो यथेष्टं धनवितरणतः स्वेष्टवस्तु प्रयच्छन्
ज्ञानिभ्यो ज्ञाननिष्ठामतिसुदृढतरां सन्ददद्भाति नित्यम् ॥ २६ ॥

दातव्या ब्रह्मविद्या ह्युपसदनविधिं पालयद्भ्यो जनेभ्यो
मत्वेत्थं देशिकेन्द्रो यतिवरनिकरान्पाठयन्सूत्रभाष्यम् ।
अम्बायाश्चन्द्रमौलेः परिचरणविधौ व्यग्रतां देशिकस्य
प्रेक्षं प्रेक्षं समर्थो मनसि समुदितं विस्मयं नो नियन्तुम् ॥ २७॥

नक्षत्रमालां बहुवृत्तशोभां संन्यासवर्षप्रमितां तु सङ्ख्याम् ।
प्राप्तां कृतां भक्तिवशात्सुवृत्तां श्रीवेङ्कटेशो गुरवेऽर्पयामि ॥ २८॥

इति श्रीवेङ्कटेशशास्त्रिणा विरचिता श्रीचन्द्रशेखरनक्षत्रमाला समाप्ता ।

(बेङ्गलूर श्रीशङ्करमठमहापाठशालाध्यक्षेण पण्डितवरेण-
वेङ्कटेशशास्त्रिणा विरचिता)
Brahmasri Venkatesvara Sastrigal, Principal,
Jagadguru Vidyasala, Sankara Mutt, Bangalore.)
An exquisite garland of twentyseven verses commemorative of
the Pontificate of His Holiness wherein the first letter of
each of the verses is culled successively from the Mahamantra :-
"श्रीमत् चन्द्रशेखरभारतीस्वामियोगिपादतलजाः विजयन्ते तमां सदा"

Proofread by Ravi Venkatraman

*Shri Chandrashekhara Nakshatramala*

pdf was typeset on December 17, 2022

Please send corrections to *sanskrit@cheerful.com*